# व्याकरणशिक्षणम्

डॉ लक्षणकुमारः
सहाचार्यः,
शिक्षाशास्त्रविभागः

सज्जीकरणम् –
आसराफ आलम खाँन

# भाषाज्ञानम्

## व्याकरणस्य महत्त्वम् –

‘**व्याकरण**’ व्युत्पत्तिः – वि+आङ्+कृ+ल्युट् प्रत्ययस्य योगेन अभवत्।अर्थात् व्यक्रियन्ते व्युत्पाद्यन्ते शब्दाः अनेनेति व्याकरणम्। येन शब्दस्य प्रकृतिप्रत्यविधानं प्रतिपाद्यते तत् व्याकरणमिति कथ्यते।

## •शब्दानुशासनम् व्याकरणम् - पतञ्जली
## •मुखं व्याकरणं स्मृतम् -

**व्याकरणस्य प्रयोजनानि** = रक्षा, ऊह, आगमः, लघु, असन्देहः - महाभाभाष्यम्

•**रक्षा** - व्यकरणाध्ययनस्य प्रधानलक्ष्यं वेदस्य रक्षा विधीयते।

•**ऊहः** - ऊह इत्यस्यार्थोऽस्ति नवीनपदानां कल्पना ।

•**आगमः** - श्रुतेः प्रामाण्यं स्वीकृत्य व्यकरणाध्यायणं प्रति द्विजस्य कर्तव्यमस्ति।

•**लघुः** – लघुतायाः कृते व्याकरणस्य पठनं पाठनम् अनिवार्यं भवति।

•**असन्देहः** – वैदिकशब्दानां विषये जातशङ्कायाः निवारणं व्याकरणमेव कर्तुं शक्नोति।

# व्याकरणशिक्षायाः आवश्यकता

**व्याकरणशिक्षणसम्बन्धे त्रीणि मतानि प्रचलानि सन्ति** –

प्रथमं मतम् – प्रथमं मतस्य समर्थकाः औपचारिकशिक्षायाः उपरि बलं ददाति।
ते मन्यन्ते अनेन मानसिकानुशासनं प्राप्यते।
सूत्राणां कण्ठस्थीकरणेन स्मरणशक्तेः, तर्कशक्ते, निरीक्षणशक्तेश्च विकासः भवति।

द्वितीयमतं – द्वितीयमतस्य समर्थकाः कथयन्ति यत् व्याकरणशिक्षणस्यावश्यकता न विद्यते, अपितु भाषां मौखिकविधिना अथवा, संरचनात्मकोपाशमेन। चेद् पाठ्येत्। तर्हि वारं वारं वदनेन, श्रॉवणेन, लेखनेन, पठनेन च भाषा स्वयमेवमधिगम्यते।

तृतीयमतं – अस्य मतस्य समर्थकाः कथयन्ति यत् व्यकरणस्य ज्ञान प्रदानं आवश्यकं विद्यते, किन्तु अस्य शिक्षणं रूचिकरं करणीयम्।नियमानां रटनस्यापेक्षा व्याकरणस्य प्रयोगः करणीयः। तस्यानन्तरं नियमानां ज्ञानं प्रदानीयम्।

## व्याकरणशिक्षणस्य उद्देश्यानि –

- छात्रेभ्यः संस्कृतभाषायाः ध्वनितत्वैः परिचायनम्।
- छात्रेषु शुद्धवाक्यरचनायाः योग्यता उत्पादनम्।
- छात्राणआं शब्दकोशे वृद्धिकरणम्।
- छात्राणां संस्कृतरचनाशक्तेः विकाशनम्।

व्याकरणस्य नियमानां तथा तस्य प्रयोगस्याज्ञानप्रदानम्

## व्याकरणशिक्षणस्य विधयः –

व्याकरणशिक्षणं रोचकम्, आकर्षकं सुग्राह्यं कर्तुं विभिन्नविधिनां प्रयोगः प्राचीनकालादेव क्रियते स्म।

# प्राचीनविधिः

- सूत्रविधिः कण्ठस्थीकरणविधिः वा।
- पारायणविधिः।
- अर्थावोधनविधिः
- वादविवादविधिः
- व्याख्यविधिः
- अव्यकृतिविधिः भाषासंसर्गविधिर्वा।
- अन्वयव्यतिरेकविधिः।
- आगमनविधिः
- निगमनविधिः

## अर्वाचीनविधिः –

- पाठ्यपुस्तकविधिः
- सहयोगविधिः समवायविधिर्वा
- आगमन निगमनविधिः